पञ्च दशः पाठः

# गीतावचनामृतानि

D8LE1C



त्वमादिदेवः पुरुषः पुराणः,

त्वमस्य विश्वस्य परं निधानम्।

वेत्तासि वेद्यं च परं च धाम,

त्वया ततं विश्वमनन्तरूप।।1।।

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।

अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।।2।।

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।

धर्मसंस्थापनार्थाय सम्भवामि युगे युगे।।3।।

सुखदुःखे समे कृत्वा, लाभालाभौ जयाजयौ।

ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि।।4।।

वासांसि जीर्णानि यथा विहाय,

नवानि गृह्णाति नरोऽपराणि।

तथा शरीराणि विहाय जीर्णा -

न्यन्यानि संयाति नवानि देही।।5।।

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।

न चैनं क्लेदयन्त्यापो न शोषयति मारुतः।।6।।

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।

मा कर्मफलहेतुर्भूः मा ते सङ्गोऽस्त्वकर्मणि।।7।।

## _शब्दार्थः_

**परम्** = सबसे बड़े। **वेत्ता** = जानकार। **वेद्यम्** = जानने योग्य। **ततम्** = फैलाया। **ग्लानिः** = हानि। **अभ्युत्थानम्** = बढ़ना, वृद्धि। **आत्मानम्**= अपने आपको। **सृजामि** = पैदा करता हँू, प्रकट करता हूँ। **परित्राणाय** = रक्षा करने के लिए। **दुष्कृताम्** = पापियों के। **संस्थापनार्थाय** = स्थापना के लिए। **सम्भवामि** =उत्पन्न होता हूँ। **कर्मणि** = कर्म में। **कदाचन** = कभी। **सङ्गः** = आसक्ति। **अकर्मणि** = अकर्म में। वासांसि = कपड़े। **जीर्णानि** = पुराने। **विहाय**= त्यागकर, छोड़कर। **अपराणि** = दूसरे। **संयाति =** जाता है, प्रवेश करता है। **देही** = आत्मा (जो शरीर में रहे)। **एनम्** = इसको (आत्मा को)। **छिन्दन्ति** = काटते हैं । **शस्त्राणि** = हथियार। **दहति** = जलाता है। **आपः** = जल। **क्लेदयन्ति** = गीला करता है। **शोषयति** = सुखाता है। **युज्यस्व** = तैयार हो जाओ। **अवाप्स्यसि** = पाओगे, प्राप्त करोगे।

## अन्वयः

1. हे अनन्तरूप! त्वं आदिदेवः, पुराणः पुरुषः (असि) त्वम् अस्य विश्वस्य परं निधानम् (असि) त्वं वेत्ता वेद्यं च (असि) त्वं परं धाम (असि) (हे अनन्तरूप!) त्वया विश्वं च ततम्।

2. हे भारत! यदा यदा हि धर्मस्य ग्लानिः (भवति) अधर्मस्य अभ्युत्थानं भवति तदा अहम् आत्मानं सृजामि।

3. (अहं) युगे युगे साधूनां परित्राणाय, दुष्कृतां विनाशाय, धर्मसंस्थापनार्थाय च सम्भवामि।

4. लाभालाभौ, जयाजयौ, सुखदुःखे समे कृत्वा ततः युद्धाय युज्यस्व । एवं पापं न अवाप्स्यसि।

5. यथा नरः जीर्णानि वासांसि विहाय अपराणि नवानि (वासांसि) गृह्णाति तथा देही जीर्णानि शरीराणि विहाय नवानि (शरीराणि) संयाति।

6. शस्त्राणि एनं न छिन्दन्ति, पावकः एनं न दहति। आपः एनं न क्लेदयन्ति, मारुतः एनं न शोषयति।

7. कर्मणि एव ते अधिकारः फलेषु कदाचन मा। त्वं कर्मफलहेतुः मा भूः। अकर्मणि ते सङ्गः अपि मा अस्तु।

## अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत -**

पुरुषः वेत्तासि विश्वमनन्तरूप सङ्गोऽस्त्वकर्मणि

अभ्युत्थानमधर्मस्य सृजाम्यहम् धर्मसंस्थापनार्थाय कर्मफलहेतुर्भूः

**2. एकपदेन उत्तरत -**

(क) पुराणः पुरुषः कः ?

(ख) अस्माकं कुत्र अधिकारः अस्ति ?

(ग) केषां परित्राणाय ईश्वरः सम्भवति ?

(घ) शस्त्राणि कं न छिन्दन्ति ?

**3. पूर्णवाक्येन उत्तरत -**

(क) परमात्मा आत्मानं कदा सृजति ?

(ख) कम् आपः न क्लेदयन्ति ?

(ग) जीर्णानि शरीराणि विहाय कः संयाति ?

(घ) पावकः कं न दहति ?

**4. निम्नाङ्कित-पदेषु सन्धिं कृत्वा तस्य नाम लिखत -**

सन्धिः नाम

यथा- बालक+अवदत् = बालकोऽवदत् पूर्वरूपसन्धिः

नरः+अपराणि = ......., .........

वेत्ता+असि = ..........,.............

कर्मणि+एव = ...........,...........

ग्लानिः+भवति = ..........,..........

सृजामि+अहम् = ........., ........

**5. अधोलिखित-पदेषु शब्दं विभक्तिं वचनं च लिखत -**

पदम् शब्दः विभक्तिः वचनम्

त्वम् युष्मद् प्रथमा एकवचनम्

साधूनाम् ..........................

धर्मस्य ..........................

फलेषु ..........................

आत्मानम् ..........................

शरीराणि ..........................

**6. अधोलिखित-विशेष्यैः सह विशेषणानि योजयत -**

*विशेष्यम्* विशेषणम्

*पुरुषः* परं

*शरीराणि* पुराणः

*निधानम्* जीर्णानि

**7. संस्कृतभाषयाम् अनुवादं कुरुत-**

(क) जल इसको गीला नहीं करता है।

(ख) धर्म की स्थापना के लिए मैं जन्म लेता हूँ।

(ग) सुख-दुःख को समान मानकर युद्ध के लिए तैयार हो।

**<u>स्मरणीयम्-</u>**

**महात्मा गान्धिः गीताविषये एव वदन्ति-**

‘‘गीता तत्त्वोपदेशग्रन्थमात्रं न। इदं महत्त्वपूर्णं धर्मविषयकं किंचन काव्यम्। यः अत्र यथा यथा अधिकं गाहते तथा तथा पुष्कलः अर्थः तेन प्राप्यते। इदं महान्तं जनसमूहं उद्दिश्य एव रचितम्। अत्र रुचिरा पुनरुक्तिः दृश्यते।’’

**शिक्षण-सङ्केतः**

*(1) सर्वेषां श्लोकानां सस्वरवाचनं कारयत।*

*(2) कृष्णार्जुनसंवादस्य प्रसङ्गं संक्षेपेण श्रावयत।*